वायोः स्वभावेन चलः कृशश्च
क्षिप्रं च कोपस्य वशं प्रयाति ॥
स्वप्रकृतिनिपुणो विहतास्यः
शब्दगतः कुशलः सुचिराङ्गः ।
त्यागयुतो पुरुषो मृदुकोपः
स्नेहरतश्च भवेन्नरसत्त्वः ॥
मर्त्यसत्त्वसंयुतो गीतभूषणप्रियः ।
संविभागशीलवानित्यमेव मानवः ॥
तीक्ष्णप्रकोपः खलचेष्टितश्च
पापश्च सत्त्वेन निशाचराणाम् ।
पिशाचसत्त्वश्चपलो मलाक्तो
बहुप्रलापी च समुत्खणाङ्गः ॥
भीरुः क्षुधालुर्बहुभुक् च यः स्यात्
ज्ञेयः स सत्त्वेन नरस्तिरश्चाम् ।
एवं नराणां प्रकृतिः प्रदिष्टा
यल्लक्षणज्ञाः प्रवदन्ति सत्त्वम् ॥
इति प्रकृतिः ॥
शार्दूलहंसमदद्विपगोपतीनां
तुल्या भवन्ति गतिभिः शिखिनाञ्च भूपाः ।
येषाञ्च शब्दरहितं स्तिमितञ्च यातं
तेऽपीश्वरा द्रुतपरिप्लुतगा दरिद्राः ॥
इति गतिः ॥
श्रान्तस्य यानमशनञ्च बुभुक्षितस्य
पानं तृषापरिगतस्य भवेषु रक्षा ।
एतानि यस्य पुरुषस्य भवन्ति काले
धन्यं वदन्ति खलु तं नरलक्षणज्ञाः ॥
पुरुषलक्षणमुक्तमिदं मया
मुनिमतान्यवलोक्य समासतः ।
इदमधीत्य नरो नृपसम्मतो
भवति सर्व्वजनस्य च वल्लभः ॥"
इति श्रीवराहमिहिरकृतौ वृहत्संहितायां पुरुषलक्षणं नामाष्टषष्टितमोऽध्यायः ॥ * ॥)
कृष्णभक्तपुरुषस्य गोविन्दपदाश्रयत्वं यथा,—
"स्त्रियो वा पुरुषो वापि ह्याततायी नपुंसकः ।
भक्तत्वे गणनीयश्चेद्गोविन्दपदमाश्रयेत् ॥"
इति पाद्मोत्तरखण्डे ८८ अध्यायः ॥
पुरुषाणां मध्ये गुरवो यथा,—
"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यो भावयति या सूते येन विद्योपदिश्यते ।
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥
आत्मा । इत्यमरः । ३ । ३ । २१८ ॥ ( यथा, भागवते । ७ । १४ । ३७ ।
"पुराण्यनेन सृष्टानि नृतिर्य्यगृषिदेवताः ।
शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥"
यथा च शङ्करविजये १३ अध्याये ।
"पुरुसंज्ञे शरीरेऽस्मिन् शयनात् पुरुषो हरिः ।
शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते ॥")
साङ्ख्यतत्त्वः । पुन्नागपादपः । इति मेदिनी । षे, ४१ ॥ (तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ॥
"कुम्भीकः पुरुषस्तुङ्गः पुन्नागो रक्तकेशरः ॥")

विष्णुः । इति शब्दरत्नावली ॥ (स हि पुराणपुरुष एव । यथा, हरिवंशे । १२८ । २० ।
"एवं पुराणः पुरुषो विष्णुर्वेदेषु पठ्यते ।
अचिन्त्यश्चाप्रमेयश्च गुणेभ्यश्च परस्तथा ॥"
शिवः । यथा, महाभारते । १३ । ८ । १४ ।
"याम्यायाव्यक्तरूपाय सद्वृत्ते शङ्कराय च ।
क्षेम्याय हरिकेशाय स्थाणवे पुरुषाय च ॥"
जीवः । यथा, शिवपुराणे वायुसंहितायां पूर्व्वभागे । ४ । १६ ।
"प्रकृतिः क्षरमित्युक्तं पुरुषोऽक्षर उच्यते ।
ताविमौ प्रेरयत्यन्यः स परः परमेश्वरः ॥")
दुर्गा । यथा,—
"महानिति च योगेषु प्रधानञ्चैव कथ्यते ।
त्रिगुणा व्यतिरिक्ता सा पुरुषश्चेति चोच्यते ॥"
इति देवीपुराणे ४५ अध्यायः ॥
तस्य पञ्चविंशतितत्त्वात्मकत्वं जडत्वञ्च यथा,—
"एभिः सम्पादितं भुङ्क्ते पुरुषः पञ्चविंशकः ।
ईश्वरेच्छावशः सोऽपि जडात्मा कथ्यते बुधैः ॥"
इति मात्स्ये तत्त्वकथनावसरे ७ अध्यायः ॥
( अश्वस्थानकभेदः । यथा, माघे । ५ । ५६ ।
श्लोकटीकायां मल्लिनाथधृतवचनम् ।
"पश्चिमेनाग्रपादेन भुवि स्थिराग्रपादयोः ।
ऊर्द्ध्वप्रेरणया स्थानमश्वानां पुरुषः स्मृतः ॥")
मेषमिथुनसिंहतुलाधनुःकुम्भराशयः । यथा,—
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"
पुरुषग्रहा यथा,—
"भौमार्कजीवाः पुरुषाः क्लीवौ सोमजभानुजौ ।
स्त्रियाख्यौ भार्गवचन्द्रौ द्वौ तत्पतित्वात्तथोच्यते ॥"
पुरुषनक्षत्राणि यथा,—
"हस्तो मूलश्रवणपुनर्व्वसुमृगशिरस्तथा पुष्यः ।
गर्भाधानादिकार्य्येषु पुन्नामायं गणः शुभदः ॥"
इति ज्योतिस्तत्त्वम् ॥
तद्वैदिकपर्य्यायः । मनुष्याः १ नरः २ धवाः ३ जन्तवः ४ विशः ५ क्षितयः ६ कृष्टयः ७ चर्षणयः ८ नहुषः ९ हरयः १० मर्य्याः ११ मर्त्ताः १२ मर्त्ताः १३ व्राताः १४ तुर्व्वशाः १५ द्रुह्यवः १६ आयवः १७ यदवः १८ अनवः १९ पूरवः २० जगतः २१ तस्थुषः २२ पञ्चजनाः २३ विवस्वन्तः २४ पृतनाः २५ । इति वेदनिघण्टौ २ अध्यायः ॥
पुरुषकं, क्ली, पुं, (पुरुष एवेति । पुरुष + स्वार्थे कन् ।) घोटकानामूर्द्ध्वस्थितिः । इति त्रिकाण्डशेषः ॥ शीखमाँगो इति हिन्दीभाषा ॥ (यथा, माघे । ५ । ५६ ।
"श्रोटचकी पुरुषकोन्नमिताग्रकायः ॥"
"पुरुषकोऽश्वानां स्थानकभेदः । यदुक्तम्,—
'पश्चिमेनाग्रपादेन भुवि स्थिराग्रपादयोः ।
ऊर्द्ध्वप्रेरणया स्थानमश्वानां पुरुषः स्मृतः ॥'
पुरुष एव पुरुषकस्तेन पुरुषकेण स्थानकेनोन्नमित ऊर्द्ध्वस्थितोऽग्रकायः पूर्व्वकायो यस्य स तथोक्तः ।" इति तट्टीकायां मल्लिनाथः ॥)

पुरुषकारः, पुं, ( पुरुषस्य कारः करणम् । ) पुरुषस्य कृतिः । पौरुषम् । चेष्टा । यथा,—
मनुरुवाच ।
"दैवे पुरुषकारे च किं ज्यायस्तं ब्रवीहि मे ।
अत्र मे संशयो देव छेत्तुमर्हस्यशेषतः ॥
मत्स्य उवाच ।
स्वमेव कर्म्म दैवाख्यं विद्धि देहान्तरार्ज्जितम् ।
तस्मात् पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥
प्रतिकूलन्तथा दैवं पौरुषेण विहन्यते ।
मङ्गलाचारयुक्तानां नित्यमुत्थानशीलिनाम् ॥
येषां पूर्व्वकृतं कर्म्म सात्त्विकं मनुजोत्तम ! ।
पौरुषेण विना तेषां केषाञ्चिद्दृश्यते फलम् ॥
कर्म्मणा प्राप्यते लोके राजसस्य तथा फलम् ।
कृच्छ्रेण कर्म्मणा विद्धि तामसस्य तथा फलम् ॥
पौरुषेणाप्यते राजन् ! मार्गितव्यं फलं नरैः ।
दैवमेव विजानन्ति नराः पौरुषवर्ज्जिताः ॥
तस्मात्त्रिकालसंयुक्तं दैवं न सफलं भवेत् ।
पौरुषं दैवसम्पत्त्या काले फलति पार्थिव ! ॥
दैवं पुरुषकारश्च कालश्च मनुजोत्तम ! ।
त्रयमेतन्मनुष्यस्य पिण्डितं स्यात् फलावहम् ॥
कृषेर्वृष्टिसमायोगाद्दृश्यन्ते फलसिद्धयः ।
तास्तु काले प्रदृश्यन्ते नैवाकाले कथञ्चन ॥
तस्मात् सदैव कर्त्तव्यं सधर्म्मं पौरुषं नृभिः ।
एवन्ते प्राप्नुवन्तीह परलोकफलं ध्रुवम् ॥
नालसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः ।
तस्मात् सर्व्वप्रयत्नेन पौरुषे यत्नमाचरेत् ॥
त्यक्त्वालसान् दैवपरान् मनुष्या-
नुत्थानयुक्तान् पुरुषान् हि लक्ष्मीः ।
अन्विष्य यत्नाद्वृणुते नृपेन्द्र !
तस्मात् सदोत्थानवता हि भाव्यम् ॥"
इति मात्स्ये दैवपुरुषकारको नाम १९५ अध्यायः ॥
( यथा च नीतिशास्त्रे ।
"यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
तथा पुरुषकारेण विना दैवं न सिध्यति ॥")
पुरुषकुञ्जरः, पुं, (पुरुषेषु कुञ्जरः श्रेष्ठ इति । पुरुषः कुञ्जर इवेत्युपमितसमासो वा । ) पुरुषश्रेष्ठः । यथा, अमरे । ३ । १ । ५९ ।
"स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः ॥"
( यथा, रामायणे । २ । १० । ५ ।
"हन्तानार्य्ये ! ममामित्रे ! सकामा भव केकयि ! ।
मृते मयि गते रामे वनं पुरुषकुञ्जरे ॥")
पुरुषत्रा, व्य, ( द्वितीयासप्तम्यर्थवृत्तेः पुरुषशब्दात् "देवमनुष्यपुरुषपुरुमर्त्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ।" ५ । ४ । ५६ । इति त्रा ।) पुरुषम् । पुरुषौ । पुरुषान् । पुरुषे । पुरुषयोः । पुरुषेषु ॥ देवादेर्द्विशोर्व्वाजितिसूत्रेण त्राच्प्रत्ययनिष्पन्नम् । देवादिस्तु देवमनुष्यपुरुषपुरुमर्त्यबहु इत्यादि । इति मुग्धबोधटीकायां दुर्गादासः । ( यथा, ऋग्वेदे । ३ । ३३ । ८ ।